**209**

**I**

Total No. of Questions - **16**

Total No. of Printed Pages - **4**

Regd. No.

# Part - II
# SANSKRIT - Paper - II
## (Second Language)

**Time : 3 Hours** **Max. Marks : 100**

209332905

Manabadi.co.in

***Note : -***

*(i) All questions should be attempted.*

*(ii) Question Nos. 1, 2, and 3 should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).*

*(iii) The remaining questions should be answered in Sanskrit (Devanagari Script) only.*

*निर्देश : प्रथम, द्वितीय, तृतीय–प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषयामेव समाधातव्याः।*

**1.** **एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत –** **1×8=8**

(अ) दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः।।

(आ) उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्।।

**2.** **एकं निबन्ध प्रश्नं समाधत्त –** **1×6=6**

(अ) रावणाय विभीषणेन कृतमुपदेशं लिखत?

(आ) मातृभूमेः वैभवं कविः कथं प्रशशंस?

209332905

**3.** **एकं निबन्ध प्रश्नं समाधत्त –** **1×6=6**

(अ) "मन्दविषसर्पकथा" इति पाठ्यभागस्य सारांशं लिखत।

(आ) अप्पय्यदीक्षितस्य जीवितचरितं संक्षेपेण लिखत।

**4.** **त्रयाणां प्रश्नानां समाधानानि लिखत –** **3×2=6**

(अ) भृगुवंशकेतुः कः?

(आ) नृपश्रियः कीदृशाः?

(इ) केन द्रुपदः गर्वान्धः जातः?

(ई) बालानां कलहः कीदृशः?

(उ) कालिदासश्लोके भोजेन प्राप्तं समाधानं किम्?

(ऊ) भोजः कोशाध्यक्षं प्रति किं सूचितवान्?

**5.** **द्वयोः ससन्दर्भं व्याख्यानं लिखत –** **2×3=6**

(अ) वदेत् क्षमं स्वामिहितं मन्त्री।

(आ) चित्रार्पितारम्भ इवाऽवतस्थे।

(इ) यत्रैताः हृदि जागृताः प्रकृतयः सा मातृभूमिर्मम।

(ई) सा संस्कृताख्या सुकृतैकलभ्या।

**6.** **द्वयोः ससन्दर्भं व्याख्यानं लिखत –** **2×3=6**

(अ) निवृत्तरागस्य गृहं तपोवनम्।

(आ) नैवाश्रितेषु महतां गुणदोषचिन्ता।

(इ) विवाहो नाम वणिग्व्यवहार एव।

(ई) अप्पय्यः साक्षात् परमशिवस्य अवतारः।

**7.** **त्रयाणां प्रश्नानां समाधानानि लिखत –** **3×2=6**

(अ) नराः क इव रणे सीदन्ति?

(आ) दिलीपेन सेव्यमानं नन्दिनीधेनुं कः चकर्ष?

(इ) पृथिव्यां त्रीणि रत्नानि कानि?

(ई) परोपदेशसमये जनाः सर्वेऽपि कीदृशाः भवन्ति?

(उ) देवगिरीणां पञ्च नामानि लिखत।

(ऊ) लोके चित्रमतिः कः?

**8.** **त्रयाणां प्रश्नानां समाधानानि लिखत –** **3×2=6**

(अ) हितोपदेशे कति भागाः सन्ति? ते च के?

(आ) ब्राह्मणः पुत्रप्राप्त्यर्थं कीदृशं व्रतमाचरितवान्?

(इ) मानसारः कथं गदां प्राप्तवान्?

(ई) मार्गशीर्षमासः कीदृशः आसीत्?

(उ) प्रभुत्वचिकित्सालये नियोगेनागता भिषगङ्गना का?

(ऊ) रत्नखेटि श्रीनिवासस्य अभिलाषा का?

Manabadi.co.in

**9.** **एकेन पदेन समाधानं लिखत –** **5×1=5**

(अ) रणे रामेण कः हतः?

(आ) दिलीपस्य धर्मपत्नी का?

(इ) सर्वत्र का पूज्यते?

(ई) मूर्खस्य कति चिह्नानि भवन्ति?

(उ) देहे सदा प्राण इव का अस्ति?

**10.** **एकेन पदेन समाधानं लिखत –** **5×1=5**

(अ) विक्रमार्कचरितं केन विरचितम्?

(आ) राजहंसस्य पत्नी का?

(इ) श्रीधरस्य ज्येष्ठभ्रातृवत् कः वर्धते?

(ई) वेङ्कटरावस्य पुत्रः कः?

(उ) अप्पय्यदीक्षितः चतुर्दशविद्याः कस्मात् अधीतवान्?

**11.** **अधोनिर्दिष्ट कथां पठित्वा प्रश्नानां समाधानानि दत्त –** **5×1=5**

चित्रकूटपर्वतनिकटतपोवनमध्ये मनोहरः कश्चित् देवालयोऽस्ति। तत्र च पर्वते अत्युदग्रात् शिखरात् विमला कापि जलधारा पतति। तत्र स्नानमात्रेण महापातकादीन्यपि नश्यन्ति। किञ्च, यस्तु पापीयान् स्नानमाचरति तस्य देहात् अतीव कलुषमुदकं निस्सरति। तेन सः पूतो भवति। अन्यच्च तत्र कश्चित् ब्राह्मणो महति होमकुण्डे प्रतिदिनं होमं करोति। न जाने तस्य कति वत्सरा गता इति। प्रतिदिनं कुण्डाद्बहिः प्रेरितं भस्म पर्वताकारम् अस्ति। स केनापि न भाषते। एवमतिविचित्रं स्थानमद्राक्षीदयं जनः।

**प्रश्नाः –**

(अ) देवालयः कुत्र अस्ति?

(आ) जलधारा कस्मात् पतति?

(इ) प्रतिदिनं होमकुण्डे कः होमं करोति?

(ई) जनः कीदृशं स्थानमद्राक्षीत्?

(उ) कस्य देहात् अतीव कलुषमुदकं निस्सरति?

**12.** **नामनिर्देशपूर्वकं त्रीणि सन्धत्त –** **3×2=6**

(अ) जगद्+जननी

(आ) पेस्+टा

(इ) अच्+अन्तः

(ई) षट्+मुखः

(उ) शिवः+अहम्

(ऊ) हरिः+गच्छति

Manabadi.co.in

**13.** त्रीणि नामनिर्देशपूर्वकं विघटयत – **3×2=6**

(अ) सच्चिदानन्दः

(आ) उड्डयनम्

(इ) षडाननः

(ई) वाङ्मयम्

(उ) सोऽपि

(ऊ) कविरायाति

**14.** द्वयोः शब्दयोः सविभक्तिक रूपाणि लिखत – **2×6=12**

(अ) राजन्

(आ) सरित्

(इ) महत्

(ई) यद् (नपुं)

**15.** समास नामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत – **3×2=6**

(अ) विद्यानिपुणः

(आ) लतातन्वी

(इ) त्रिलोकी

(ई) कंसकृष्णौ

(उ) प्रत्यक्षम्

(ऊ) महाबलः

**16.** अधोनिर्दिष्ट पट्टिकामाधारीकृत्य पञ्च साधु रूपाणि लिखत – **5×1=5**

| | | |
|---|---|---|
| वयं | ग्रामं | गमिष्यति |
| यूयं | समाधानं | करिष्यन्ति |
| ते | पाकं | पठिष्यामः |
| ताः | सत्यं | वदिष्यन्ति |
| देवाः | देवालयं | लेखिष्यथ |

2093329052

Manabadi.co.in